


श्रीमत् वेदान्त रामानुज मुनि करुणालब्ध वेदान्त युग्मम्
श्रीमत् श्रीवास योगीश्वर गुरुपदयोर्पित स्वात्मभारम्
श्रीमत् श्रीरङ्गनाताह्वय मुनिकृपया प्राप्त मोक्षाश्रमं तं
श्रीमत् वेदान्त रामनुज मुनिमपरम् संश्रये देशिकेन्द्रम्



श्रीमत् श्रीवास योगीश्वर मुनि करुणालब्ध वेदान्त युग्मम्
श्रीमत् वेदान्त रामानुज गुरुपदयोर्पित स्वात्मभारम्
श्रीमत् श्रुत्यन्त रामानुज यति नृपतेः प्राप्त मोक्षाश्रमं तं
श्रीमत् श्रीवास रामनुजमुनिं संश्रये ज्ञानवार्धिम्



वेदान्त लक्ष्मण मुनीन्द्र कृपात्त बोधम्
तत्पाद युग्म सरसीरुह भृङ्गराजम्
त्रय्यन्त युग्म कृतभूरि परिश्रमं तं
श्रीरङ्ग लक्ष्मणमुनिम् शरणं प्रपद्ये

# शान्ति पञ्चकम्

***shAnti pa~nchakam***

# शान्ति पञ्चकम्

शं नो॑ मि॒त्रश्शं वरु॑णः। शं नो॑ भवत्वर्य॒मा। शं न॒ इन्द्रो॒ बृह॒स्पतिः॑।
शं नो॒ विष्णु॑रुरुक्र॒मः। नमो॒ ब्रह्म॑णे। नम॑स्ते वायो। त्वमे॒व प्र॒त्यक्षं॒ ब्रह्मा॑सि।
त्वामे॒व प्र॒त्यक्षं॒ ब्रह्म॑ वदिष्यामि। ऋतं व॑दिष्यामि। स॒त्यं व॑दिष्यामि। तन्माम॑वतु।
तद्व॒क्तार॑मवतु। अव॑तु माम्। अव॑तु व॒क्तार᳚म्।

ओं शान्ति॒ः शान्ति॒ः शान्तिः॑॥

शं नो॑ मि॒त्रश्शं वरु॑णः । शं नो॑ भवत्वर्य॒मा । शं न॒ इन्द्रो॒ बृह॒स्पतिः॑ ।
शं नो॒ विष्णु॑रुरुक्र॒मः । नमो॒ ब्रह्म॑णे । नम॑स्ते वायो । त्वमे॒व प्र॒त्यक्षं॒ ब्रह्मा॑सि ।
त्वामे॒व प्र॒त्यक्षं॒ ब्रह्मावा॑दिषम् । ऋतम॑वादिषम् । स॒त्यम॑वादिषम् । तन्मामा॑वीत् ।
तद्व॒क्तार॑मावीत् । आवी॒न्माम् । आवी᳚द्व॒क्तार᳚म् ।

ओं शान्ति॒ः शान्ति॒ः शान्तिः॑॥

स॒ह ना॑ववतु । स॒ह नौ॑ भुनक्तु । स॒ह वी॒र्यं॑ करवावहै ।
ते॒ज॒स्विना॒वधी॑तमस्तु मा वि॑द्विषा॒वहै᳚ ।

ओं शान्ति॒ः शान्ति॒ः शान्तिः॑॥

नमो॑ वा॒चे या चो॑दि॒ता या चानु॑दि॒ता तस्यै॑ वा॒चे नमो॒ नमो॑ वा॒चे नमो॑ वा॒चस्पत॑ये॒ नम॒
ऋषि॑भ्यो मन्त्र॒कृद्भ्यो॒ मन्त्र॑पतिभ्यो॒ मामामृष॑यो मन्त्र॒कृतो॑ मन्त्र॒पत॑यः॒ परा॑दु॒र्माऽहमृषी᳚न्-मन्त्र॒कृतो॑
मन्त्रपती॒न्परा॑दां वैश्वदे॒वीं वाच॑मुद्यसꣳ शि॒वामद॑स्तां॒ जुष्टा᳚न् दे॒वेभ्यः॒ शर्म॑ मे॒ द्यौः शर्म॑ पृथि॒वी
शर्म॒ विश्व॑मि॒दं जग॑त्।

शर्म॑ च॒न्द्रश्च॒ सूर्य॑श्च शर्म॑ ब्रह्म प्रजाप॒ती।

# शान्ति पञ्चकम्

भूतं वदिष्ये भुवनं वदिष्ये तेजो वदिष्ये यशो वदिष्ये तपो वदिष्ये ब्रह्म वदिष्ये सत्यं वदिष्ये तस्मा अहमिदमुपस्तरण-मुपस्तृण उपस्तरणं मे प्रजायै पशूनां भूयाद्-उपस्तरणमहं प्रजायै पशूनां भूयासं प्राणापानौ मृत्योर्मापातं प्राणापानौ मा माहासिष्टं मधु मनिष्ये मधु जनिष्ये मधु वक्ष्यामि मधु वदिष्यामि मधुमतीं देवेभ्यो वाचमुद्यासꣳ शुश्रूषेण्यां मनुष्येभ्यस्तं मा देवा अवन्तु शोभायै पितरोऽनुमदन्तु ।

ओं शान्तिः शान्तिः शान्तिः ॥

ओं तच्छंयोरावृणीमहे । गातुं यज्ञाय । गातुं यज्ञपतये । दैवी स्वस्तिरस्तु नः । स्वस्तिर्मानुषेभ्यः । ऊर्ध्वं जिगातु भेषजम् । शन्नो अस्तु द्विपदे । शं चतुष्पदे ।

ओं शान्तिः शान्तिः शान्तिः ॥

शं नो वातः पवतां मातरिश्वा शं नस्तपतु सूर्यः । अहानि शं भवन्तु नश्शꣳ रात्रिः प्रतिधीयताम् । शमुषानो व्युच्छतु शमादित्य उदेतु नः । शिवा नश्शन्त माभव सुमृडीका सरस्वति ।

माते व्योम सन्दृशि । इडायैवास्त्वसि वास्तु मद्वास्तुमन्तो भूयास्म मा वास्तो श्छिथ्स्मह्य-वास्तुस्स भूयाद्योऽस्मान्द्वेष्टि यं च वयं द्विष्मः ।

प्रतिष्ठासि प्रतिष्ठावन्तो भूयास्ममा प्रतिष्ठाया श्छिथ्समह्य प्रतिष्टस्स भूयद्योऽस्मान्द्वेष्टि यं च वयं द्विष्मः । आवातवाहि भेषजं विवातवाहि यद्रपः ।
त्वꣳहि विश्वभेषजो देवानां दूत ईयसे । द्वाविमौ वातौ वात आसिन्धोरापरावतः ॥

# शान्ति पञ्चकम्

दक्षं मे अन्य आवातु परान्योवातु यद्रपः । यददोवाततते गृहेऽमृतस्य निधिर्हितः ।
ततो नो देहि जीवसे ततो नो देहि भेषजं । ततो नो मह आवह वात आवातु भेषजम् ।

शम्भूर्मयोभूर्नोहृदे-प्रण आयूꣳषि तारिषत् । इन्द्रस्य गृहोऽसि तं त्वा प्रपद्ये सगुस्साश्वः । सह यन्मे अस्ति तेन । भूः प्रपद्ये भुवः प्रपद्ये सुवः प्रपद्ये भूर्भुवस्सुवः प्रपद्ये वायुं प्रपद्येनार्तां देवतां प्रपद्येऽश्मानमाखणं प्रपद्ये प्रजापतेर्ब्रह्मकोशं ब्रह्मप्रपद्य ओं प्रपद्ये ।

अन्तरिक्षं म उर्वंअतरं ब्र्इहदग्नयः पर्वताश्च यया वातः स्वस्त्या स्वस्तिमान्तया स्वस्त्या स्वस्तिमानसानि । प्राणापानौ मृत्योर्मापातं प्राणापानौ मा मा हासिष्टं मयि मेधां मयि प्रजां मय्यग्निस्तेजो दधातु मयि मेधां मयिप्रजां मयीन्द्र इन्द्रियं दधातु मयि मेधां मयि प्रजां मयि सूर्यो भ्राजो दधातु ॥

द्युभिरक्तुभिः परिपातमस्-मानरिष्टेभिरश्विना सौभगेभिः । तन्नो मित्रो वरुणो मामहन्तामदितिः सिन्धुः पृथिवी उतद्योः । कयानश्चित्र आभुव दूती सदावृधस्सखा ।

कयाशचिष्ठया वृता । कस्त्व सत्यो मदानां मꣳहिष्ठो मत्सदन्धसः । दृडा चिदारुजे वसु । अभीषुणस्-सखीनामविता जरि तृणाम् । शतं भवास्यूतिभिः ।

वयस्सुपर्णा उपसेदुरिन्द्रं प्रियमेधा ऋषयो नाधमानाः अपध्वान्तमूर्णुहि पूर्धि-चक्षुर्-मुमुग्ध्यस्मान्-निधयेव बद्धान् ।

शं नो देविरभिष्टय आपो भवन्तु पीतये । शंयोरभिस्रवन्तु नः ।

ईशानावार्याणां क्षयन्तीश्चर्षणीनाम् । अपो याचामि भेषजम् । सुमित्रान आप ओषधयः सन्तु दुर्मित्रास्तस्मै भूयासूर्योऽस्मान्द्वेष्टि यं च वयं द्विष्मः ।

# शान्ति पञ्चकम्

आपो हि ष्ठा मयोभुवस्ता न ऊर्जे दधातन। महेरणाय चक्षसे। यो वः शिवतमो रसस्तस्य भाजयते हनः। उशतीरिव मातरः। तस्मा अरङ्गमामवो यस्य क्षयाय जिन्वथ। आपो जनयथा च नः।

पृथिवी शान्ता साग्निना शान्ता सामे शान्ता शुचꣳ-शमयतु। अन्तरिक्षꣳशान्तं तद्वायुना शान्तं तन्मे-शान्तꣳ शुचꣳशमयतु।

द्योश्शान्ता सादित्येन शान्ता सामे शान्ता शुचꣳ शमयतु।

पृथिवी शान्तिरन्तरिक्षꣳ शान्तिर्-द्योश्शान्तिर्-दिशश्शान्ति-रवान्तरदिशाश्शान्ति-रग्निश्शान्तिर्-वायुश्शान्ति-रादित्यश्शान्तिश्-चन्द्रमश्शान्तिर्-नक्षत्राणि-शान्ति-रापश्शान्ति-रोषधयश्शान्तिर्-वनस्पतयश्शान्तिर्-गौश्शान्ति-रजा शान्ति-रश्वश्शान्तिः पुरुषश्शान्ति-ब्रह्म शान्ति-ब्रह्मणाश्शान्तिश्-शान्तिरेव शान्तिश्-शान्तिर्मे अस्तु शान्तिः।

तयाहꣳ शान्त्या सर्व शान्त्या मह्यं द्विपदे चतुष्पदे च शान्तिं करोमि शान्तिर्मे अस्तु शान्तिः॥

एह श्रीश्च ह्रीश्च धृतिश्च तपो मेधा प्रतिष्ठा श्रद्धा सत्यं धर्मश्चैतानि मोत्तिष्ठन्त-मनूत्तिष्ठन्तुमा-माꣳ-श्रीश्च ह्रीश्च धृतिश्च तपो मेधा प्रतिष्ठा श्रद्धा सत्यं धर्मश्चैतानि मा मा हासिषुः।

उदायुषा स्वायुषोदोषधीनाꣳ रसेनोत्पर्जन्यस्य शुष्मेणोदस्था ममृताꣳ अनु।
तच्चक्षुर् देवहितं पुरस्ताच्छुक्रमुच्चरत्।

# शान्ति पञ्चकम्

पश्येम शरदश्शतं जीवेम शरदश्शतं नन्दाम शरदश्शतं मोदाम शरदश्शतं भवाम शरदश्शतꣳ शृणवाम शरदश्शतं प्रब्रवाम शरदश्शतमजीतास्याम शरदश्शतं ज्योक्क सूर्यं दृशे ।

य उदगान्महतोऽर्णवाद्-विभ्राजमानस्-सरिरस्य मध्यात्समा वृषभो लोहिताक्षस्सूर्यो विपश्चिन्मनसा पुनातु ॥

ब्रह्मणश्चोतन्यसि ब्रह्मण आणीस्थो ब्रह्मण आवपनमसि धारितेयं पृथिवी ब्रह्मणा मही धारितमेनेन महदन्तरिक्षं दिवं दाधार पृथिवीꣳ सदेवां यदहं वेद तदहं धारयाणि मामद्वेदोऽधि विस्रसत् ।

मेधामनीषे माविशताꣳ समीची भूतस्य भव्यस्यावरुध्यै सर्वमायुरयाणि सर्वमायुरयाणि ।

आभिर्गीर्भिर्यदतोन ऊनमाप्यायय हरिवो वर्धमानः । यदास्तोतृभ्यो महि गोत्रा रुजासि भूयिष्ठभाजो अध ते स्याम । ब्रह्म प्रावादिष्म तन्नो मा हासीत् ॥

ओं शान्तिः शान्तिः शान्तिः ॥

पर्याप्त्या अनन्तरायाय सर्वस्तोमोऽति रात्र उत्तम महर्भवति सर्वस्याप्त्यै सर्वस्य जित्यै सर्वमेव तेनाप्नोति सर्वं जयति ॥